॥अथ कदलीव्रतप्रारंभः॥श्रीः॥

DR. BHAU DAJI
MEMORIAL

कदलीव्रत शुद्ध

श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥अथभाद्रपदेचतुर्दश्यांकदलीव्रतं॥ ॥हेमाद्रेःसंविधा॥यत्सिद्धंसमाख्यातंकदलीव्रतमुत्तमं॥तत्तेऽहंसंप्रवक्ष्यामिलोकानुग्रहकारकं॥नाकपृष्ठेपुरादेवैर्यत्सगंधर्वकिन्नरैः॥अप्सरोभिरकन्याभिर्नागकन्याभिरर्चितं॥संसारात्सरतांश्रेष्ठंकदलीव्रतमुत्तमं॥॥शुक्लपक्षेचतुर्दश्यांमासिभाद्रपदेनृप॥दध्यन्नंवरस्त्रीभिःफलैर्नानाविधैस्तथा॥विरूढैःसप्तधान्यैश्चदीपाद्यैरक्तचंदनैः॥दधिदूर्वाक्षतैर्वस्त्रैर्वेद्यैर्घटसमर्चितैः॥जातीफलैःपूगफलैःपूजयेद्गतमत्सरा॥तस्मैदद्यादनंदातव्यं स्त्रीभिरन्याभिरेवच॥मंत्रेणानेनवैदद्यार्घ्यंतंश्रृणुष्वनराधिप॥चिंतयेत्कदलीनित्यंकदलेःकामदोपिता॥शरीरारोग्यलावण्यंदेहिदेविनमोस्तुते॥एवंयःपूजयेद्भक्त्यापुरुषोभक्तिमान्नृप॥नारीवानग्निपक्वाशीचिन्मासाश्वनुराप्पिवा॥तस्मिन्कुलेनरिभवेत्कश्चिन्नारीकुलाटिनी॥दुर्गतादुर्भगाव्यंगास्वरिणीपापचारिणी॥भवेत्सोभाग्यसोख्याढ्यापुत्रपौत्रश्रियायुता॥आयुष्मतीजीववत्साजीवेद्वर्षशतंसुखात्॥इतिहेमाद्रौकदलीव्रतं॥॥अथगुर्जराचारप्राप्तंकार्तिक्यांमाघ्यांवैशाख्यांवाकदलीव्रतं॥॥तत्रौकदलीपूजनं॥आगच्छकदलीदेवीसौभाग्यफलदायिनी॥रूपंदेहिजयंदेहियशोदेहिसुनिश्चितं॥आगच्छागच्छवरदेशंकरेणसमेश्वरी॥कारिष्यमाणंपूजामेगृहाणानुग्रहंकुरु॥आवाहनं॥कांतस्वरमयंदिव्यंनानामणिगणान्वितं॥अधितिष्ठमहादेवीशंकरेणसहपार्वती॥आसनं॥इत्यासनादिभिर्युक्तंस्वर्णपात्रेस्थितंशुभं॥पाद्यार्थंकल्पितंभक्त्यागृहाणपरमेश्वरी॥पाद्यं॥अर्घ्यपात्रस्थितंतोयंफलपुष्पसमन्वितं॥अर्घ्यंगृहाणमेदेविभक्त्यादत्तंशिवप्रिये॥अर्घ्यं॥कर्पूरवासितैःशीतैःसुरभिःशीतलैर्विमलैर्जलैः॥गंगायास्तसमानीतंगृहाणाचमनीयकं॥आचमनं॥गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतं॥स्नानार्थंतेमयादत्तंगृहाणपरमेश्वरि

श्रीः १

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

श्वरी।।स्नानं।।यथारंभेविघ्नास्तेशाखादीनांसदाभवेत्।।तथावर्धयमांदेवीसेवनात्पार्वती
प्रिये।।इतिसेचनमंत्रः।।वस्त्रंसुभ्रमिदंदिव्यंकुंकुमाक्तंसुशोभितं।।गृहाणाछादनंदेवीतथाछाद
यमांसदा।।वस्त्रं।।श्रीखंडचंदनंदिव्यं०।।गंधं।।मालतीचंपकादीनिशतपत्रादिकानन।।सु
गंधीनिगृहाणत्वंपूजार्थंसुमनोभव।।पुष्पं।।अगरुंगुग्गुलुंधूपंदशांगंसुमनोहरं।।गृहाण
देवदेविकरघ्राणस्यदयितंफलं।।धूपं।।क्षुद्दंसर्वलोकानांतिमिरस्यनिवारणं।।आर्तिक्यं
देहिमेनित्यंगृहाणपरमेश्वरी।।दीपं।।नानापक्वान्नसंयुक्तंरसैःषड्भिसमन्वितं।।नैवेद्यंवि
विधंभक्त्याकल्पितंतंगृहाणमे।।नैवेद्यं।।इदंफलमिति०।।फलं।।कर्पूरैलालवंगादिना
गयुक्तंदलान्वितं।।पुगीफलंसमायुक्तंताम्बूलंप्रतिगृह्यतां।।तांबूलं।।हिरण्यगर्भगर्भ
रुमितिदक्षिणा०।।आज्यंचवर्तिसंयुक्तमितिनीराजनं।।त्वमिंद्राणीप्रियानित्यंपार्वत्यष्ट्वा
तिवल्लभा।।सतिलंकामदापूज्याकामान्मेपरिपूरय।।अर्घ्यं।।आश्रयोदेवपत्नीनांजि

तानांचाश्रयास्वयं।।सौभाग्यारोग्यमायुष्यंदेहिरंभेनमोस्तुते।।इतिनमस्कारः।।अथकद
लीदानमंत्रः।।कदल्येकामदाभिन्येभवायतेनमोनमः।।रंभायैसुतिसारायैसर्वसौख्यप्रदेनमः।।
अथायथातेप्रसवोवर्धतेकदलीध्रुवं।।तथामनोरथानामेप्रसवोवर्धतांस्वयं।।।।इतिकदलीस्तन
मंत्रः।।।।अथकथा।।युधिष्ठिरउवाच।।कृष्णकृष्णमहाबाहोसर्वविद्याविशारद।।त्वम
स्माकंपरोबंधुस्त्वमस्माकंपरःसखा।।१।।किंचित्पृच्छामिदेवेशितत्कथंकुरुसत्तम।।यदु
च्यसर्वधर्मेषुकृतेयस्मिन्महत्फलं।।२।।सौभाग्यारोग्यदंपुण्यंधनधान्याभिवृद्धिदं।।
अन्नाछादनपुत्रादिवर्धनंश्रीनिकेतनं।।३।।तन्ममाख्यस्वभगवन्लोकानामुपकारकं।।श्री
कृष्णउवाच।।शृणुराजन्प्रवक्ष्यामिव्रतानामुत्तमंव्रतं।।यत्कृत्वासर्वदुःखेभ्योनारीमुच्येतसंक
टात्।।वस्त्रान्नपानवस्तूनांसदातस्यनभवेत्कचित्।।सामान्यमेकांतेरुक्मिणीप्राणवल्लभा।।
प्रणिपत्याब्रवीद्दीनासर्वकामाप्तयेशुभा।।सौभाग्यंमेकथंदेवभवेज्जन्मनिजन्मनि।।सप
त्नीनांश्रियंवीक्ष्यस्पृहामेजायतेशुभा।।इतिप्रियायावचनंश्रुत्वाहंतांसमब्रवीत्।।रंभा

कदलीव्रतं व्रतंकुरुष्वसुसौभाग्यावाप्तयेशुभं॥कृतेयस्मिन्व्रतेदेविपरंसौभाग्यमाप्स्यसि॥
इतिश्रुत्वावचोदेवीरुक्मिणीमाममाधव॥संभ्रांतामवलोक्यैवंविधिंकिंवप्रजल्पन॥
रुक्मिनीभाषणंश्रुत्वापुनरेवाहमब्रवं॥संभ्रांतविधिवत्स्थश्रृणुदेवीयथोदितं॥गोमयमात्रं
सौकुंभ्यसर्वतोभद्रमंडलं॥लिखेत्कुंजयेद्वर्णैर्नीलपीतैःसितासितैः॥अस्याघादेवतास्तत्रस्था
पयित्वापूजयेत्॥कलशोपरिसंस्थाप्यवर्णवस्त्रंशुभं॥उमामहेश्वरौतत्रमूलमंत्रेण
पूजयेत्॥अथवास्थंडिलेकुर्यात्पद्ममष्टदलंशुभं॥तत्रसायंसपर्णालिंसस्थैःसर्वतआ
वृतां॥समूलंकदलीतत्रपूजयेत्तांयथाविधि॥उत्तमोदकमानीयस्नपयेत्तांसमाहिता॥
यथाभोगिधृधिस्तारंस्वामीनासदाभवेत्तथावर्धयमांदेवीसेवनात्पार्वतीप्रिये॥यथा
यथातेत्रसंवृद्धिर्कदलीतव॥तथामनोरथानांमेप्रभावात्वंसुखंवह॥एवंसपूजनवि
धिंवह्नत्यासुकृतेचेतसा॥रात्रौजागरणंकुर्याद्गीतवाद्यैर्निस्वनैः॥एवंयःकुरुतेनारी
व्रतानामुत्तमंव्रतं॥सुकृतुविविधान्भोगान्सौभाग्यंचैतिभूवं॥तस्मात्कुरुविधानेन

यथोक्तफलमाप्स्यसि॥सतिश्रुत्वाविधानेनत्वंकुरुव्रतमुत्तमं॥अवाप्तसकलान्कामान्मनसा
येविचिंतिताः॥अन्यच्चश्रृणुराजेंद्रव्रतस्यफलमुत्तमं॥अत्याश्चर्यकरंसांबश्रृणुष्वावहितोभ
वान्॥धृतेयदाजिताप्रार्थकल्याणीतासभासती॥दुःशासनेनदुष्टेनद्रौपदीमुक्तमूर्धजा॥
आकृष्यमाणावस्त्रेतुविनेभामस्मरत्तदा॥अकृतव्रणतस्तूर्णंद्रौपद्यास्त्राणकारणं॥अदृ
श्यमानःकृष्णायेव्रतंसमुपदिष्टवान्॥तदाकृतंमयाव्रतेसिंहराजसत्तम॥रुक्मिण्यावि
तंपूर्वंयत्तद्व्रतमुत्तमं॥तस्यपुण्यफलंदत्तंकृष्णायेराजसत्तम॥तत्कालमेवस्त्रा
णांसम्हरोभवत्तदा॥दुःशासनेनदुष्टेनअक्षिप्तेषुभ्रुकुंचयोः॥प्रादुर्भूतानिवस्त्राणि
नानावर्णानिभारत॥खिन्नोदुःशासनःपापोविरामाप्यकृतव्रतात्॥तावद्भवद्भुर्व
स्त्रागिकदलीगर्भवन्नृप॥इत्थंव्रतप्रभावोयंमयात्वंपिकथितोमया॥कोर्य
स्त्वविधानेनपूर्णकामोभविष्यसि॥॥॥इतिकथासमाप्ता॥॥श्रीः॥
॥॥अथोद्यापनं॥युधिष्ठिरउवाच॥कस्मिन्मासितिथौकस्यांवत्सरेव्रतमु

स्त्रीव्रतं नृणां।उद्यापनंकथंकार्यंतन्ममाचक्ष्वकेशव।।।कृष्णउवाच।।कार्तिकेमाघमासेवा
वैशाखेचेतरेतया।।पुण्येमासिप्रकुर्वीतपौर्णमास्यांशुभेदिने।।तिथिस्तूयंव
र्नयीतशुभायांसुसमाहितः।।यस्मिन्दिनेनलभ्येतकदलीराजसत्तम।।।सुवर्णस्यशु
भांतत्रकृत्वापूजांसमाचरेत्।।यदिलभ्येतकदलीमारोप्यादौप्रपूजयेत्।।यावन्नस्याः
फलंतावत्संचिन्नीरेणपूजयेत्।।कदलेघृतपक्वेषुतदाविप्रासमाक्रयेत्।।भ्र
भातेतद्दिनेस्नात्वानद्यादौविमलजले।।अकृतेवाससीधृत्वातदासंध्यादि
कर्मच।।अग्निंसंस्थाप्यविधिवत्
ब्रह्मंसमाचरेत्।।शतमष्टोत्तरंविप्रान्सिलाज्याकृतिभिस्तथा।।एकाग्रचि
तःसंदृष्टःकृत्वाव्याहृतिभिःपृथक्।।ब्रह्मादीभ्योदेवताभ्योनामभिःपृथक्
पृथक्।।आचार्यंवस्त्रपत्नीकंवस्त्रालंकारधेनुभिःपूजयेत्ततः।।धेनुंपयस्विनीवत्सयुतांरत्नैः
स्वलंकृतां।।स्वर्णशृंगीरौप्यखुरांकांस्यदोहनकायुतां।।अभ्यर्च्यवेदविदुषेआचार्या

श्रीः

यानिद्येत्।।चतुर्वंशस्त्रोत्रियांवायुग्मान्यानीयसंयतः।।वस्त्रालंकारगंधाद्यैःपूजयित्वातु
भोजयेत्।।दद्यान्नानाविधंयत्नंवंशपात्रैःसुशोभितः।।दद्याच्चदक्षिणांसम्यग्यथावित्तानुसार
तः।।अन्येभ्योपियथाशक्तिदद्यादन्नंसुसंस्कृतं।।समापयित्वातांदेवींव्रतस्यपरिपूर्णता।।वाच
यित्वायथान्यायंमाशीर्वादंवाचयेत्।।दीनानाथाप्रतर्प्यांभुंस्वयंभुंजीतवाग्यतः।।एवंयःकुरु
तेदेवीकदलीव्रतमुत्तमं।।सुखान्तुविपुलान्भोगान्सौभाग्यंविंदतेध्रुवं।।तस्मात्कुरुविधानेनय
थोक्तफलमाप्स्यसि।।एवंनारीनरोवापियःकुर्यात्कदलीव्रतं।।सर्वान्कामानवाप्नोति
स्वर्गलोकेमहीयते।।।।इतिभविष्योत्तरपुराणेकदलीव्रतंसंपूर्णं।।।।अथव्रतानांउनुक्तो
द्यापनेसर्वव्रतानांसाधारणोक्तउद्यापनविधेरथोचितेदयेनदीपुराण्यकुर्याद्युद्यापनं
तस्यसमाप्तोपकुदीरितं।।उद्यापनंविनायत्तुव्रतंनिष्फलंभवेत्।।वित्तानुसारतोदद्यादनु
क्तोद्यापनेव्रते।।गांवैवकांचनंदद्याद्व्रतस्यपरिपूर्तये।।इत्यनुक्तोद्यापनउद्यापनविधिः।।
श्रीकृष्णार्पणमस्तु।।।।मरुद्देवोजयति।।।।

दलीव्रत.

॥इति कदलीव्रतकथासमाप्तः॥

श्रीः